International Journal of Sanskrit Research 2020; 6(2): 209-210

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 209-210
© 2020 IJSR
www.anantaajournal.com
Received: 03-01-2020
Accepted: 05-02-2020

**Dr. Harish PN**
Pooradath Mana, P.O. Cherpu,
Perumbillissery, Thrissur
District, Kerala, India

**Corresponding Author:**
**Dr. Harish PN**
Pooradath Mana, P.O. Cherpu,
Perumbillissery, Thrissur
District, Kerala, India

# चम्पूसाहित्ये दर्शनानां प्रभावः

**Dr. Harish PN**

**प्रस्तावना**

**उपक्रमः**

कवेः कर्म एव काव्यम् । काव्ये दृश्यकाव्यं, श्रव्यकाव्यं चेति द्वौ विभागौ स्तः । नाटकादिरूपकाणि नाटिकाद्युपरूपकाणि च दृश्यकाव्ये अन्तर्भवन्ति । गद्यं, पद्यं, चम्पूः चेति त्रिधा भवति श्रव्यकाव्यम् । "गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते" इति चम्पूलक्षणं काव्यादर्शे प्रथमतया एव दण्डिनोक्तम् । किन्तु संस्कृतचम्पूग्रन्थेषु प्रथमगणनीया भवति दशमशतके त्रिविक्रमभट्टविरचिता नलचम्पूः ।

यथा संस्कृतसाहित्ये महाकाव्यं, खण्डकाव्यं, स्तोत्रकाव्यं इत्यादयः काव्यभेदाः दृश्यन्ते तथा चम्पूकाव्यप्रमेयविषये अपि वैविध्यानि सन्ति । चम्पूसाहित्ये कृतयः भक्तिप्रचारणं, मतप्रचारणं, राजवंशानां वीरनायकस्य च महत्ववर्णनं, दार्शनिकसिद्धान्तानां प्रतिपादनं, व्यक्तिवर्णनं, प्रकृतिवर्णनं, अलङ्कारसिद्धान्तानां प्रतिपादनं इत्यादि चम्पूसाहित्ये निबद्धानि बहूनि विषयाणि सन्ति । चम्पूसाहित्ये पुराणकथाः एवं काल्पनिक कथाः अपि च प्रमेयविषयीभूता एव ।

चम्पूग्रन्थाः रामायणं, महाभारतं, शिवपुराणं, भागवतपुराणं इत्यादि पुराणग्रन्थानवलम्ब्य रचिताः। ते च भक्तिप्रचारणाय प्रयुज्यन्ते । चम्पूग्रन्थेषु आदिपुराणं, उत्तरपुराणं इत्यादि जैनपुराणवलम्बीनि चम्पूकाव्यानि च दृश्यन्ते । भरतः, जीवन्धरः इत्यादि जैननायकानां वर्णनं, जैनमतप्रचारणं च साधयितुं एते ग्रन्थे उपकुर्वन्ति ।

चम्पूसाहित्ये यात्राप्रबन्धाः अतिप्रसिद्धाः । तेषु काव्येषु तीर्थयात्रास्थलानि, प्रसिद्धक्षेत्राणि, देवतानां वर्णनं च अतिमनोहारितया आविष्कृतानि। अपि तु यात्राप्रबन्धेषु प्रकृतिवर्णनं च अद्वितीयया रीत्या एव दृश्यते। वाचिकाणां प्रकृतेः चित्रणमपि साधयितुं शक्यते । विषयवर्णनं तु कल्पितकथापात्रयोः सम्भाषणद्वारा चित्रीकरोति । यात्राप्रबन्धेषु प्रमेयस्य मनोरञ्जनार्थं प्रणयकथाभागानपि सम्यक् रीत्या प्रतिपादयति । यात्राप्रबन्धानां मुख्योद्देश्यं भक्तिप्रचारणमेव इति सुस्पष्टम् ।

चम्पूकृतीनां विषयावतरणं न केवलं भक्तिप्रचारणमेव, अपि तु शङ्कराचार्यः, रामानुजाचार्यः, नाथमुनिः इत्यादि प्रसिद्धाचार्याणां जीवनचरितं तथा तेषांदार्शनिकसिद्धान्तप्रतिपादनपराणीति च आविष्कुर्वन्ति । पुनश्च सोमदेवविरचिता यशस्तिलकचम्पूः, हरिश्चन्द्रेण रचिता जीवन्धरचम्पूः चेत्यादि ग्रन्थाः दार्शनिकद्वारा जैनसिद्धान्तं प्रतिपाद्य जैनदर्शनं प्रथयन्ति।। तत्र चम्पूसाहित्यस्य दार्शनिकसम्बन्धीनि काव्यानि संगृह्यन्ते ।

**सोमदेवस्य यशस्तिलकचम्पूः**

जैनदर्शनसम्बन्धीनि प्रसिद्धो ग्रन्थः भवति सोमदेवविरचिता यशस्तिलकचम्पूः । सोमदेवः राज्ञः अरिकेसरी तृतीयस्य राजसभायां पण्डितः आसीत् । सोमदेवः दशमशतकस्य उत्तरार्धे जैनमते उत्तरपुराणमवलम्ब्य अमुं ग्रन्थं विरचयामास । अस्मिन् ग्रन्थे अष्टाध्यायाः आश्वासरूपेण अन्तर्भवन्ति । अस्य ग्रन्थस्य प्रथमादारभ्य चतुर्थाश्वासपर्यन्तं उत्तरपुराणे अन्तर्गता एका जैनकथा प्रतिपादिता एवं अन्तिमेषु चतुर्थाश्वासेषु जैनधर्मं तत्सम्बन्धिप्रवृत्तयः च सविस्तरं प्रतिपादयन्ति ।

**हरिश्चन्द्रस्य जीवन्धरचम्पूः**

जैनदर्शनप्रतिपादितो अन्यो चम्पूग्रन्थः भवति हरिश्चन्द्रस्य जीवन्धरचम्पूः । अयमपि ग्रन्थः जैनानां उत्तरपुराणमवलम्ब्य जैनमतप्रचारणार्थं दशमशतके विरचितः । अस्मिन् ग्रन्थे एकादशाध्यायाः लम्बकरूपेण अन्तर्भवन्ति । अत्र जैनपुराणे नायकस्य जीवन्धरस्य जैनमतस्वीकारकथा प्रतिपादयति ।

**अण्णायार्यस्य तत्त्वार्थदर्पणः**

अण्णायार्येन विरचितः तत्त्वार्थदर्पणः अपरं चम्पूकाव्यं भवति । सः ग्रन्थं अध्यायरूपेण न विभजति । अस्मिन् ग्रन्थे ग्रन्थकर्ता शैव-वैष्णव दर्शनानि सौहृदसम्भाषणद्वारा प्रतिपाद्य वैष्णवदर्शनस्य श्रेष्ठतां सयुक्तिकं स्थापयति ।

**अहोबलसूरिणः यतिराजविजयचम्पूः**

चतुर्दशशतके अहोबलसूरिणा विरचितं चम्पूकाव्यं भवति यतिराजविजयचम्पूः । ग्रन्थकर्ता तत्चम्पूकाव्ये विशिष्टाद्वैतसिद्धान्तस्य आचार्यस्य श्रीनिवासरामानुजस्य जीवनं, तस्य सिद्धान्तः अपि च विवृणोति । अस्य ग्रन्थस्य मुख्योद्देश्यं विशिष्टाद्वैतसिद्धान्तस्य प्रचारणमेव । सः न केवलं रामानुजं किन्तु शठकोपमुनिः, नाथमुनिः, पुण्डरीकाक्षः, यामुनाचार्यः चेति विशिष्टाद्वैते ये अन्ये आचार्याःतेषामपि नाममात्रप्रतिपादनं करोति।

**मण्डिक्कल् श्रीरङ्गाचार्यस्य श्रीरामानुजचरित्रचम्पूः**

मण्डिक्कल् श्रीरङ्गाचार्येन विरचितं श्रीरामानुजचरित्रचम्पूः अपि विशिष्टाद्वैतसिद्धान्तस्थापको श्रीनिवासरामानुजस्य जीवनं तद्वैशिष्ट्यं, तस्य सिद्धान्तःच अपि स्पष्टतया परामृशति । अस्मिन् ग्रन्थे षट् अध्यायाः विलासरूपेण सन्ति । सः ग्रन्थारम्भे इष्टदेवतारूपेण भगवन्तं विष्णुं स्तुवन् तथा रामानुजः, वेदान्तदेशिकः इत्यादि विशिष्टाद्वैतस्याचार्याणामपि नमस्कारादिकं कृत्वा सम्यक् स्तौति ।

**वल्लीसहायकवेः आचार्यदिग्विजयचम्पूः**

पञ्चदशशतके वल्लीसहायकविना विरचितं चम्पूकाव्यं भवति आचार्यदिग्विजयचम्पूः । अस्मिन् ग्रन्थे सप्त अध्यायाः कल्लोलरूपेण विभक्ताः एव । सः शङ्कराचार्यस्य जीवनचरित्रं तथा तस्य अद्वैतसिद्धान्तं अपि च स्पष्टतया विवृणोति । अस्य ग्रन्थस्य मुख्योद्देश्यं अद्वैतसिद्धान्तस्य प्रचारणमेव इति सुस्पष्टम् ।

**चिरञ्जीवि भट्टाचार्यस्य विद्वन्मोदतरङ्गिणिः**

पञ्चमशतके चिरञ्जीवि भट्टाचार्येण विरचितं चम्पूकाव्यं भवति विद्वन्मोदतरङ्गिणिः । अस्मिन् काव्ये सर्वे भारतीयदर्शनानि प्रतिपादितमेव । अत्र काव्ये अष्टाध्यायाः तरङ्गरूपेण विभक्ताः । ग्रन्थकर्ता सर्वदार्शनिकाचार्याणां मेलनं, तत्मेलने तेषां स्वसिद्धान्तस्थापनं तथा परसिद्धान्तखण्डनं च युक्तियुक्तं प्रतिपादयति । तदनन्तरं ग्रन्थकर्ता विविधदर्शनानां समन्वयमेव प्रतिपादयति ।

संस्कृतसाहित्ये चम्पूकाव्यमण्डले दार्शनिकसम्बन्धीनि अन्याः कृतयः अपि वर्तन्ते । तेषु रामानुजदासस्य नाथमुनिविजयचम्पूः, रामानुजाचार्यस्य श्रीरामानुजचम्पूः, वेदान्ताचार्यस्य आचार्यदिविजयचम्पूः इत्यादि कृतयः प्रसिद्धा एव ।

**उपसंहारः**

चम्पूसाहित्यस्य दार्शनिकमण्डले सर्वदर्शनानि नाममात्रेण प्रतिपादितानि । परन्तु चम्पूसाहित्यस्य दार्शनिकमण्डले तथा चम्पूग्रन्थकारेषु च अन्यदर्शनान्यपेक्ष्य वेदान्तदर्शनस्य महत्वं स्वीकार्यमेव । बौद्धानामपि चम्पूकाव्यस्य शैलिः स्वकीयग्रन्थेषु स्वीकुर्वन्ति । अपि तु चम्पूसाहित्ये बहवः जैनाचार्याः स्वकीयग्रन्थेषु जैनपुराणमवलम्ब्य जैनसिद्धान्तमपि परिपोषयन्ति । चम्पूसाहित्यस्य बहवः वैष्णवाचार्याः सन्ति । ते स्वकृतिषु शैवदर्शनसम्बन्धिसिद्धान्तान् युक्तियुक्तं खण्डयित्वा वैष्णवदर्शनमनुसृत्य तत्सिद्धान्तश्रेष्ठत्वं स्थापयन्ति ।

**ग्रन्थसूची**


1. Samskritasahithyacharithram [Vol-I,II], Dr. K. Kunjunni Raja and Dr. M.S. Menon [Ed.], Kerala Sahitya Akademi, Thrissur, 2002 (Rep.)
2. Studies in Champu Literature, C.R. Deshpande., Bharatiya Vidya Prakashan, Delhi, 1992